# .. shrI subrahmaNyadaNDakam ..

# ॥ श्रीसुब्रह्मण्यदण्डकम् ॥

## Document Information

Text title : shrii subrahmaNyadaNDakam

File name : subradaNDaka.itx

Location : doc_subrahmanya

Language : Sanskrit

Subject : Hinduism/religion/traditional

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : October 7, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ श्रीसुब्रह्मण्यदण्डकम् ॥

जय वह्निसुताकान्त जय शङ्करनन्दन ।
जय मारशताकार जय वल्लीमनोहर ॥

जय भुजबलनिर्जितानेक विद्याण्डभीकारिसंग्राम
कृत्तरकावाप्त गीर्वाणभीद्वान्त मार्ताण्ड षड्वक्त्र
गौरीश फालाक्षि सम्जात तेजसमुद्भूत देवापगा
पत्मषण्डोत्थित स्वाकृते, सूर्यकोटि द्युते भूसुराणांगते,

शरवणभव
कृत्यकास्तन्यपानाप्तषड्वक्त्रपत्माद्रिजाताकरांभोज
संलाळनातुष्ट काळीसमुत्पन्न वीराग्र्यसंसेवितानेकबालोचित
क्रीडिताकीर्णवाराशिभूभृद्वनीसंहते, देवसेनरते
देवतानां वते,

सुरवरनुत दर्शितात्मीय दिव्यास्वरूपामरस्तोम सम्पूज्य
कारागृहावाप्तकज्जातस्तुत्याश्चर्यामाहात्म्य
शक्त्यग्रसंभिन्न शैलेन्द्र दैतेय संहार सन्तोषितामार्त्य
संक्लृप्त दिव्याभिषेकोन्नते, तोषितश्रीपते,

सुमशरसमदेवराजात्म भूदेवसेनाकर ग्राहसम्प्राप्त
संमोदवल्ली मनोहारि लीलाविशेषेन्द्रकोदण्डभास्वत्कलापोच्य
बर्हीन्द्र वाहाधिरूढातिदीनं कृपादृष्टिपातेन मांरक्ष
तुभ्यं नमो देव तुभ्यं नमः ॥

॥ श्री सुब्रह्मण्य दण्डकं संपूर्णम् ॥

Encoded and proofread by
Antaratma antaratma at Safe-mail.net

.. shrI subrahmaNyadaNDakam ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*